पृ १.

शो. १७८४

५३) देशकाळे संकीर्तन

संस्कृत

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशायनमः॥देशकालौसंकीर्त्य मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्री
त्यर्थं सहस्रसंख्याकं गायत्रीजपं करिष्ये॥ गुरवे नमः गणेशाय नमः दुर्गायै
नमः मातृभ्यो नमः इति नत्वा त्रिः प्राणानायम्य तत्सवितुरिति गायत्र्या विश्वामि
त्रऋषिः सविता देवता गायत्री छंदः जपे विनि० विश्वामित्रऋषये नमः शिरसि।
गायत्रीछंदसे नमो मुखे॥ सविता देवतायै नमो हृदये इति न्यस्य तत्सवितुरंगुष्ठा
भ्यां नमः वरेण्यं तर्जनीभ्यां नमः॥ भर्गो देवस्य मध्यमाभ्यां नमः। धीमहि अनामि
काभ्यां० धियो यो नः कनिष्ठिकाभ्यां० प्रचोदयात् करतलकरपृष्ठाभ्यां० तत्सवितु
हृदयाय० वरेण्यं शिरसे स्वा० भर्गो देवस्य शिखायै० धीमहि कवचाय हुं। धियो
यो नो नेत्रत्रयाय वषट्। प्रचोदयादस्त्राय फट् इति न्यासं विधाय ॐ अविघ्नं
कुरु माले त्वमिति मालामादाय मंत्रदेवतां सवितारं ध्यायन् मंत्रार्थं स्मरन्

५८

ग॰वि॰ मध्यंदिनावधिजपेत् जपांते पुनः प्रणवमुक्त्वा मालां शिरसि निधाय पूर्वोक्तन्या
सं प्राणायामत्रयं कृत्वा अनेन जपेन भगवान्परमेश्वरः प्रीयतामित्यर्पयेत्
३ इति गायत्रीजपविधिः ॥ ॥ देशकालौ स्मृत्वा श्रीविष्णुप्रीतिकामः
(2) सहस्रसंख्याकैस्तुलसीदलैर्विष्णुं पूजयिष्ये इति संकल्प्य शांताकार
मिति ध्यात्वा गंधादिभिः संपूज्य विष्णुसहस्रनामभिः सहस्रतुलसीद
लानि समर्प्य पुनः पंचोपचारैः संपूज्य प्रार्थयेत् ॥ आजन्ममरणं याव
द्यन्मया दुष्कृतं कृतं ॥ तत्प्रणाशय गोविंद प्रसीद पुरुषोत्तम ॥ यस्य
स्मृत्या च॰ मंत्रहीनमिति पठित्वा अनेन सहस्रसंख्याकतुलसीदला
र्पणेन कर्मणा श्रीविष्णुः प्रीयतां ॥ शके १७८४ दुंदुभी॰ भाद्रपदपौर्णिमायां समाप्त ३

A project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com